गुर्व्वी, स्त्री, ( गुरुर्भारयुक्तो गर्भोऽस्याः । गुरु+ ङीष् । ) गर्भवती । इति हेमचन्द्रः । ३ । २०३ ॥ ("नहि वन्ध्या विजानाति गुर्व्वीप्रसववेदनाम् ॥" इति हितोपदेशः ॥)

गुरुपत्नी । ( गुरोः पत्नीति गुरु+ङीष् । ) गौरवयुक्ता । ( गुरु+वोतोगुणवचनात् ।" ४ । १ । ४४ । इति विभाषायां ङीष् ।) यथा । "अनन्यगुर्व्व्यास्तवकेन केवलः पुराणमूर्त्तेर्म्महिमावगम्यते । इति माघः ॥ ( गुरुभारविशिष्टा । यथा, महाभारते । ३ । २२ । ३७ । "ततः शार्ङ्गं गदां गुर्व्वीमाविध्यन्तं महाहवे । द्विधाचकार सहसा प्रजज्वाल च तेजसा ॥" गायत्री । यथा,— देवीभागवते । १२ । ६ । ४२ । "गुहावासा गुणवती गुरुपापप्रणाशिनी । गुर्व्वी गुणवती गुह्या गोप्तव्या गुणरूपिणी ॥")

गुलः, पुं, ( गुड़+डलयोरैक्याड्कारस्य लत्वम् । ) ऐत्तवः । गुड़ः । इति मेदिनी । ले । १३ ॥

गुलञ्चकन्दः, पुं, ( गुलञ्चस्य लताविशेषस्य कन्द इव कन्दोऽस्य गुलं गुड़वद्रसं अञ्चति अञ्च+ अण् । ततः शकन्ध्वादित्वादलोपे गुलञ्चः तादृशः कन्दः । इति केचित् । ) कन्दविशेषः । कुली इति भाषा । तत्पर्य्यायः । गुच्छाङ्ककन्दः २ बलाङ्ककन्दः ३ निचुलिका ४ । अस्य गुणाः । मधुरत्वम् । सुशीतलत्वम् । दृष्यप्रदत्वम् । तर्पणत्वम् । दाहनाशित्वञ्च । इति राजनिर्घण्टः ॥

गुला, स्त्री, ( गुलः गुड़इव रसोऽस्त्यस्या इति अर्श आदिभ्योऽच् ततष्टाप् । ) स्नुहीवृक्षः । इति मेदिनी । ले । १३ ॥

गुली, स्त्री, (गुड़ः चुद्रवर्त्तुलाकृतिर्व्विषमयस्फोटाकृतिरित्यर्थः विद्यतेऽस्याः इति अर्श आदिभ्योऽच् ततो ङीष् । ) गुटिका । रोगभेदः । वसन्त इति ख्यातः । इति मेदिनी । ले । १४ ॥

गुलुच्छः, पुं, (गुच्छ+पृषोदरात् साधुः ।) गुच्छः । स्तवकः । इति त्रिकाण्डशेषः ॥

गुलुञ्छः, पुं, ( गुडति गोलाकारेण वेष्टयतीति गुड़+क्विप् गुड् तं तदाकारं उञ्छति आदत्ते उपार्ज्जयति वा । उञ्छ "कर्म्मण्यण् ।" ३ । २ । १ । इति अण् । ततो डस्यलत्वे साधुः । ) गुच्छः । इति हेमचन्द्रः । ४ । १६२ ॥

गुलुञ्छकः, पुं, ( गुलुञ्छ+स्वार्थे कन् । ) गुच्छः । इति शब्दरत्नावली ॥

गुल्फः, पुं, ( गल+"कलिगलिभ्यां फगस्योच ।" उणां । ५ । २६ । इति फक् अकारस्योत्वं च । ) पादग्रन्थिः । तत्पर्य्यायः । घुटिका २ । इत्यमरः । २ । ६ । ७२ ॥ चरणग्रन्थिः ३ घुटिकः ४ घुण्टकः ५ घुण्टः ६ । इति हेमचन्द्रः । ३ । २७८ ॥ ( यथा, गो: रामायणे । ६ । २३ । १२ । "समावेतौ करौ पादौ गुल्फौ चावनतौ मम ॥")

गुल्मः, पुं, (गुड़ति वेष्टयति गुध्यते वेष्ट्यते वा, गुड़+ करणे बाहुलकात् मक् डलयोरैक्यात् डस्यलत्वे साधुः ।) उदरजरोगविशेषः । तस्य निदानादि ।

"दुष्टा वातादयोऽत्यर्थं मिथ्याहारविहारतः । कुर्व्वन्ति पञ्चधा गुल्मं कोष्ठान्तर्ग्रन्थिरूपिणम् ॥ * तस्य पञ्चविधं स्थानं पार्श्वे हृन्नाभिवस्तयः । हृन्नाभ्योरन्तरे ग्रन्थिः सञ्चारी यदि वाचलः ॥ वृत्तश्चयापचयवान् स गुल्म इति कीर्त्तितः । स व्यस्तैर्जायते दोषैः समस्तैरपि चोच्छ्रितैः ॥ पुरुषाणां तथा स्त्रीणां ज्ञेयो रक्तेन चापरः ॥ * तस्य पूर्व्वरूपं यथा,—

"उद्गारबाहुल्यपुरीषबन्ध-
तृप्त्यक्षमत्वान्त्रविकूजनानि ।
आटोपमाध्मानमपक्तिशक्ति-
रासन्नगुल्मस्य वदन्ति लिङ्गम् ॥" * ॥

तस्य सामान्यरूपम् ।
"अरुचिः कृच्छ्रविण्मूत्रवातताऽन्त्रविकूजनम् । आनाहश्चोर्द्ध्ववातत्वं सर्व्वगुल्मेषु लक्षयेत् ॥ * ॥ वातिकस्य निदानं यथा,—

"रूक्षान्नपानं विषमातिमात्रं
विचेष्टनं वेगविनिग्रहश्च ।
शोकोऽभिघातोऽतिमलक्षयश्च
निरन्नता चानिलगुल्महेतुः ॥" * ॥

वातिकस्य रूपम् । यथा,—

"यः स्थानसंस्थानरुजा विकल्पं
विड्वातसङ्गं गलवक्त्रशोषम् ।
श्यावारुणत्वं शिशिरज्वरञ्च
हृत्कुक्षिपार्श्वांसशिरोरुजञ्च ॥
करोति जीर्णेऽभ्यधिकं प्रकोपं
भुक्ते मृदुत्वं समुपैति यश्च ।
वातात् स गुल्मो न च तत्र रूक्षं
कषायतिक्तं कटु चोपशेते ॥" * ॥

पैत्तिकस्य निदानं यथा,—

"कट्वम्लतीक्ष्णोष्णविदाहिरूक्ष-
क्रोधातिमद्यार्कहुताशसेवा ।
आमाभिघातो रुधिरञ्च दुष्टं
पैत्तस्य गुल्मस्य निमित्तमुक्तम् ॥" * ॥

पैत्तिकस्य रूपं यथा,—

"ज्वरः पिपासा वदनाङ्गरागः
शूलं महज्जीर्य्यति भोजने च ।
स्वेदो विदाहो व्रणवच्च गुल्मः
स्पर्शासहः पैत्तिकगुल्मरूपम् ॥" * ॥

श्लैष्मिकस्य निदानम् ।

"शीतं गुरु स्निग्धमचेष्टनञ्च
संपूरणं प्रस्वपनं दिवा च ।
गुल्मस्य हेतुः कफसम्भवस्य
सर्व्वस्तु दुष्टो निचयात्मकस्य ॥" * ॥

श्लैष्मिकस्य रूपम् ।

"स्तैमित्यशीतज्वरगात्रसाद-
हृल्लासकासारुचिगौरवाणि ।
शैत्यं रुगल्पा कठिनोन्नतत्वं
गुल्मस्य रूपाणि कफात्मकस्य ॥" * ॥

द्वन्द्वजस्य रूपं यथा,—

"निमित्तलिङ्गान्युपलभ्य गुल्मे
द्विदोषजे दोषबलाबलञ्च ।
व्यामिश्रलिङ्गानपरांश्च गुल्मां-
स्त्रीनादिशेदौषधकल्पनार्थम् ॥" * ॥

त्रिदोषजस्य रूपं यथा,—

"महारुजं दाहपरीतमश्मवद्
घनोन्नतं शीघ्रविदाहिदारुणम् ।
मनःशरीराग्निबलापहारिणं
त्रिदोषजं गुल्ममसाध्यमादिशेत् ॥" * ॥

अथ स्त्रीणां रक्तजगुल्मनिदानं यथा,—

"नवप्रसूताहितभोजना या
या चामगर्भं विसृजेदृतौ वा ।
वायुर्हि तस्याः परिगृह्य रक्तं
करोति गुल्मं सरुजं सदाहम् ॥" * ॥

स्त्रीणां रक्तजगुल्मलक्षणं यथा,—

"पैत्तस्य लिङ्गेन समानलिङ्गं
विशेषणञ्चाप्यपरं निबोध ।
यः स्पन्दते पिण्डित एव नाङ्गै-
श्चिरात् सशूलः समगर्भलिङ्गः ॥
स रौधिरः स्त्रीभव एव गुल्मो
मासे व्यतीते दशमे चिकित्स्यः ।
स्त्रीणामार्त्तवजो गुल्मो न पुंसामुपजायते । अन्यस्त्वसृग्भवो गुल्मः स्त्रीणां पुंसाञ्च जायते ॥ अथासाध्यलक्षणं यथा,— सञ्चितः क्रमशो गुल्मो महावास्तुपरिग्रहः । कृतमूलः शिरानद्धो यदा कूर्म्म इवोन्नतः ॥ दौर्ब्बल्यारुचिहृल्लासकासच्छर्द्यरतिज्वरैः । तृष्णातन्द्राप्रतिश्यायैर्युज्यते न स सिध्यति ॥ गृहीत्वा सज्वरं श्वासच्छर्द्यतीसारपीड़ितम् । हृन्नाभिहस्तपादेषु शोथः कर्षति गुल्मिनम् ॥ श्वासः शूलं पिपासान्नविद्वेषो ग्रन्थिमूढ़ता । जायते दुर्ब्बलत्वञ्च गुल्मिनो मरणाय वै ॥" इति माधवकरः ॥ * ॥

तच्चिकित्सा यथा,—

"वातारितैलेन पयोयुतेन
पथ्यासमेतेन विरेचनं हि ।
संस्वेदनं स्निग्धमतिप्रशस्तं
प्रभञ्जनक्रोधकृते तु गुल्मे ॥
खर्ज्जिकाकुष्ठसहितः क्षारः केतकसम्भवः । पीततैलेन शमयेद्गुल्मं पवनसम्भवम् ॥ तित्तिरांश्च मयूरांश्च कुक्कुटान् क्रौञ्चवर्त्तकान् । सर्पिः शालिं प्रसन्नाञ्च वातगुल्मे प्रयोजयेत् ॥ * ॥ पित्तगुल्मे त्रिवृच्चूर्णं पातव्यं त्रिफलाम्बुना । विरेकाय सितायुक्तं कम्पिल्लं वा समाक्षिकम् ॥" त्रिफलाम्बुना त्रिफलाक्वाथेन । कम्पिल्लं कम्बिला इति लोके ।

"अभयां द्राक्षया खादेत् पित्तगुल्मी गुड़ेन वा ॥ * योगैश्च वातगुल्मोक्तैः श्लेष्मगुल्ममुपाचरेत् ॥ अपरैश्च बलासघ्नैर्युक्तियुक्तैः शमं नयेत् ॥" * ॥ हिङ्गुग्रन्थिकधान्यजीरकवचाचव्याग्निपाठाशटीवृक्षाम्लं लवणत्रयं त्रिकटुकं क्षारद्वयं दाड़िमम् । पथ्यापौष्करवेतसाम्लहवुषाजाज्यस्तदेभिः कृतं चूर्णं भावितमेतदार्द्रकरसैः स्याद्बीजपूरद्रवैः ॥ गुल्मानाहगुदाङ्कुरान् ग्रहणिकोदावर्त्तसंज्ञौ गद